# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०८** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE-3.5.10 | समयः – १० :०० तः ०१:०० |
| दिनाङ्कः – १२/१२/२०१८ | ग्रन्थः – संस्कारभास्करः | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या। १०**

(१) काञ्चनं हस्तवलयं रूपकान्ति सुखप्रदम्।
विभूषणं प्रदास्यामि विभूषयतु मां सदा॥

(२) जन्मजन्मसहस्त्रेषु यत्कृतं पातकं मया॥
स्वर्णपात्रप्रदानेन शान्तिस्तस्यास्तु मे सदा॥

(३) धान्यं देहि धनं देहि पशुन्देहि भामिनि।
यशो देहि सुखं देहि सर्वकार्यकरी भव॥

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) दानस्य महत्त्वं विलिख्य कस्यचिदेकस्य दानस्य समन्त्रकं व्याख्यां कुरुत।

(२) यथाशास्त्रं दासीदानमन्त्रविधिं समन्त्रकं प्रतिपादयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेषु द्वयोः व्याख्या विधेया। १०**

(१) एवत्तोमेखिलसौभाग्यं पुण्यैस्त्वं विविधैः कृतैः।
देवैः सम्पादितो मस्त्वं वधूराद्येपदेऽब्रवित्।

(२) शुभं करोतु कल्याणं आरोग्यं धनसम्पदम्।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

(३) मम व्रतेते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु।
मम वाचमेक-मना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्॥

**प्रश्नः ४ एकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) संस्कारभास्करानुसारं लाजाहोमविधिं समन्त्रकं प्रतिपादयत।

(२) आधुनिकसमाजं प्रति 'सप्तपदी' इत्यस्य किमस्ति महत्त्वं वर्णयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु द्वयोः टिप्पणी कार्या। १०**

(१) पुनर्विवाहः (२) अर्कप्रार्थना

(३) अश्मारोहणम्

**प्रश्नः ६ अधस्तनयोः एकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) यथाशास्त्रं देवकोत्थापनविधिं वर्णयत।

(२) अर्कविवाहविधिं समन्त्रकं विवेचयत।

**प्रश्नः ७ अधोलिखितेषु केषाञ्चन दश प्रश्नानाम् अतिलघूत्तरं लिखत। १०**

(१) विवाहः कति विधः ?

(२) विवाहकर्मणि आवाहिताग्नेः नाम किम् ?

(३) मन्त्रशब्दस्य कोऽर्थः ?

(४) पारस्करगृह्यसूत्रानुसारं कति संस्काराः?

(५) शिलारोहणकर्मणि कन्या आदौ पाषाणस्योपरि कस्य पादस्य स्थापनं करोति?

(६) लाजाहोमे होमेद्रव्याणि कानि ?

(७) लाजाशब्देन किमुच्यते?

(८) राष्ट्रभृद्धोमे कति होममन्त्राः ?

(९) आचायार्य वरं ददाति- इति कथनेन किं ज्ञायते ?

(१०) सप्तपदिवचनेषु द्वितीयवचनं किमस्ति ?

(११) ' शिव ' इति शब्दस्य कोऽर्थः ?

(१२) पञ्चभूसंस्कारे कानि द्रव्याणि?

(१३) कति मन्त्राः जयाहोमे भवन्ति ?

(१४) दशदिक्पालेषु अन्तिमस्थानं कस्य वर्तते?

(१५) ' स्वधा ' इति शब्दस्य कोऽर्थः ?

***